# .. shrii subrahmaNyama NgaLaaShTakaM ..

# ॥ श्री सुब्रह्मण्यमङ्गळाष्टकं ॥

शिवयोसूनुजायास्तु श्रितमन्दार शाखिने ।
शिखिवर्यातुरंगाय सुब्रह्मण्याय मङ्गळं ॥

भक्ताभीष्टप्रदायास्तु भवमोग विनाशिने ।
राजराजादिवन्द्याय रणधीराय मङ्गळं ॥

शूरपद्मादि दैतेय तमिस्रकुलभानवे ।
तारकासुरकालाय बालकायास्तु मङ्गळं ॥

वल्लीवदनराजीव मधुपाय महात्मने ।
उल्लसन्मणि कोटीर भासुरायास्तु मङ्गळं ॥

कन्दर्पकोटिलावण्यनिधये कामदायिने ।
कुलिशाअयुधहस्ताय कुमारायास्तु मङ्गळं ॥

मुक्ताहारलसत् कुण्ड राजये मुक्तिदायिने ।
देवसेनासमेताय दैवतायास्तु मङ्गळं ॥

कनकांबरसंशोभि कटये कलिहारिणे ।
कमलापति वन्द्याय कार्तिकेयाय मङ्गळं ॥

शरकाननजाताय शूराय शुभदायिने ।
शीतभानुसमास्याय शरण्यायास्तु मङ्गळं ॥

मंगळाष्टकमेतन्ये महासेनस्यमानवाः ।
पठन्ती प्रत्यहं भक्त्याप्राप्नुयुस्तेपरां श्रियं ॥

॥ इति सुब्रह्मण्य मङ्गळाष्टकं संपूर्ण ॥

॥ इतर मङ्गळ श्लोकानि ॥

नित्योत्सवो भवत्येषां नित्यश्रीर्नित्य मङ्गळं ।

येषां हृदिस्थो भगवान् मङ्गळायतनं गुहः ॥

राजाधिराजवेषाय राजत् कोमळपाणये ।
राजीवचारुनेत्राय सुब्रह्मण्याय मङ्गळं ॥

॥ इतिः ॥

Encoded and proofread by
Antaratma antaratma at Safe-mail.net

---

Please send corrections to sanskrit@cheerful.com
Last updated September 30, 2005